# Shri Brahmalekhini athavA Mahagayatri Svarupavarnana Stotram

# શ્રીબ્રહ્મલેખિની અથવા મહાગાયત્રી સ્વરૂપવર્ણનસ્તોત્રમ્

## Document Information

Text title : Brahmalekhini Svarupavarnana Stotram

File name : brahmalekhinIsvarUpavarNanastotram.itx

Category : devii, devI, dashamahAvidyA, stotra

Location : doc_devii

Transliterated by : Durga Sharma

Proofread by : Durga Sharma

Latest update : June 14, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 14, 2026

*sanskritdocuments.org*

# શ્રીબ્રહ્મલેખિની અથવા મહાગાયત્રી સ્વરૂપવર્ણનસ્તોત્રમ્

ૐ ઐં હ્રીં શ્રીં સૌઃ ૐ નમો ભગવત્યૈ બ્રહ્મલેખિન્યૈ
પરામ્બાઽનન્તકોટિ-બ્રહ્માણ્ડ-ભાગ્ય-વિધાત્ર્યૈ નમઃ ॥

અથ શ્રીબ્રહ્મલેખિની અથવા મહાગાયત્રી સ્વરૂપવર્ણનસ્તોત્રમ્ ॥

પાદારવિન્દ વિન્યસ્ત નખચન્દ્રિકાવિરાજિત પાદાઙ્ગુષ્ઠમણ્ડલ
 લલત્પાવન નૂપુર નિનાદ ધ્વનિત-સુષુમ્નાપથગામિની ।
નખનિર્જિતરક્તવિદ્રુમ પલ્લવવર્ણસંશોભિત-પાદતલમધ્યગત
પદ્મરાગપરાગરાજિત જગજ્જનની ચરણકમલવન્દના ॥ ૧॥

જઙ્ઘાદ્વયસૌષ્ઠવ વિજિત રમ્ભાસ્તમ્ભ સૌન્દર્ય-નિતાન્તસુન્દર
સુવૃત્તજઙ્ઘાસંસ્થિત દિવ્યવર-કાઞ્ચીગુણ-રત્નોજ્જ્વલા ।
જાનુદ્વય-સમ્મિશ્રિત-યોગમાયામયી જાનુકૂર્પર-વિરાજિત-
પાર્થિવશક્ત્યધિષ્ઠિત-પવિત્ર-તપોમયી-જઙ્ઘામણ્ડલ-સઙ્કાશા ॥ ૨॥

ઊરુદ્વયવિજિત ગજશુણ્ડદણ્ડ-સૌકુમાર્ય-કનકપિઙ્ગલ-વર્ણ-
ભાસ્વર-સુન્દર-કાઞ્ચનશ ૃઙ્ખલા-વિરાજિત-જઘનમણ્ડલ-
મધ્યસ્થ-કુણ્ડલિનીશક્તિસ્વરૂપા ।
નાભિમણ્ડલ-વિવર-વિનિર્ગત-બ્રહ્માણ્ડકોટિ-સૃષ્ટિ-સ્થિતિ-
ધ્વંસકારિણી નૂતન-લેખનીધર-કર-પદ્મચિહ્નિત-
મહાપીઠ-નાભિસ્થલી ॥ ૩॥

કટિતટ-વિલસદ્રત્નકિઙ્કિણીજાલ-ગુમ્ફિત-સકલવિશ્વ-
લેખનપરમ્પરાધારભૂત-વૈદૂર્યકાન્તિ-વિરાજિત-જઘનસુન્દરી ।
સ્તનદ્વય-ભરનતગાત્રસૌન્દર્ય-કુસુમિત-સૌવર્ણકલશ-સન્નિભ-
પીનસ્તનભાર-વિરાજિત-વિશ્વપાલનશક્તિધારિણી-પ્રકૃતિસ્વરૂપા ॥ ૪॥

કણ્ઠદેશ-સઞ્ચારિ-મુક્તાહાર-દ્યુતિપુઞ્જિત-બ્રહ્મરન્ધ્રસન્નિભ-
શઙ્ખરેખા-રઞ્જિત-કણ્ઠવલય-સુશોભિત-વાક્સિદ્ધિપ્રદાત્રી ।

બાહુદશસહસ્રચતુષ્ટય-વિરાજિત-યુગપદ્વિશ્વકર્મકારિણી પાશાઙ્કુશ-
લેખની-પત્ર-વિભૂષિત-કરપલ્લવ-વૈચિત્ર્ય-વિશારદા ॥ ૫॥

સ્કન્ધદ્વય-સુદૃઢ-સૌષ્ઠવ-વિરાજિત-દિવ્યકવચ-મણ્ડિત-
સર્વદિગ્દન્તિન-દન્તનિભ-ભુજદણ્ડ-સંશોભિત-જગદમ્બા ।
મુખપઞ્ચક-રાજિત-દિક્પાલ-વિજિત-સૌન્દર્ય-ચારુવદનમણ્ડલ-
ચતુર્દિશોન્મુખ-ચતુર્વદન-ઊર્ધ્વમુખ-પઞ્ચમવદન-વિરાજિત-
જ્ઞાનમયી ॥ ૬॥

નેત્રત્રય-યુગલ-મીનચક્ષુઃપ્રભા-વિજિત-મદનમોહન-સૌન્દર્ય-
વિસ્તારિત-નેત્રોત્પલ-રાજિત-સકલલોકમોહનશક્તિ ।
ઊર્ધ્વનેત્ર-વિરાજિત-આજ્ઞાચક્ર-સન્નિભ-અખણ્ડિતકાલચક્ર-
દર્શનવિશારદા-સહસ્રનેત્ર-સમ્પન્ન-બ્રહ્મલેખિનીપ્રભા ॥ ૭॥

નાસિકાગ્ર-વિરાજિત-મુક્તામણિ-દ્યુતિ-સમુલ્લસિત-સુદીર્ઘ-નાસિકાપુટ-
મણ્ડિત-સર્વપ્રાણશક્તિ-સઞ્ચારિણી-દિવ્યનાસા ।
કપોલયુગલ-પિઙ્ગાભા-વિરાજિત-રક્તચન્દન-સદૃશ-સુકોમલ-
દન્તચ્છદ-વિભ્રમાણુ-ભાસ્વર-પ્રકાશમયી-શ્રીવદના ॥ ૮॥

કુન્તલ-વિરાજિત-સર્પસદૃશ-દીર્ઘકુટિલ-કેશપાશભાર-મણ્ડિત-
શિરોભાગેન્દુકલા-કોટિશોભિત-મહાદેવ-પવિત્ર-શિરોમુકુટ-શિરોમણિ ।
એકાક્ષરીપ્રણવ વ્યાહૃતિ ગાયત્રી સાવિત્રી તારાવીતસ્વભાવ-નીલૈકજટા
ત્વરિત-વલ્ગાદ્ય-કામકલા વાગ્દેવી લેખિનીબ્રહ્મવિદ્યામયી ॥ ૯॥

ઇતિ શિવરહસ્યપઞ્ચરાત્રે પઞ્ચવક્ત્રશિવવિરચિતં
શ્રીબ્રહ્મલેખિની અથવા મહાગાયત્રી સ્વરૂપવર્ણનસ્તોત્રં સમ્પૂર્ણમ્ ॥

Note :

Brahmlekhini deity belongs to the Urdhvamnaya tradition of Tantra. Her name has different meanings. In general, she is the Brahma-Shakti who writes or reveals divine knowledge. She is regarded as the Samvit Shakti, the power of consciousness and knowledge, of Parakrishna. Krishna has many Shaktis, such as Hladini, Samvit, Sandhini, and others. Most people know Radha as the Hladini Shakti. Brahmlekhini is the Samvit Shakti of Krishna. She is a divine Shakti and not simply a wife of Krishna. She is not lesser than Krishna. Brahmlekhini is also known as Parabrahma Shakti. In Tantra, she is

identified with the original Kaushiki or Mahasaraswati. She is a very secret and mystical deity, similar to Goddess Kubjika and Shrijika who are forbidden goddess. Brahmlekhini is the highest Lekhini Devi.

Encoded and proofread by Durga Sharma

---

*Shri Brahmalekhini athavA Mahagayatri Svarupavarnana Stotram*
pdf was typeset on June 14, 2026

Please send corrections to *sanskrit@cheerful.com*